# आदर्श–प्रश्नपत्रम्– प्रथमसत्रम्

## कक्षा– द्वादशी

## विषयः– संस्कृतम् कोर (कोड– 322)

**समयः– 90 मिनट** **सम्पूर्णाङ्कः –40**

सामान्यनिर्देशाः -

☞ कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 9 प्रमुखाः प्रश्नाः सन्ति। 50 वैकल्पिकप्रश्नाः सन्ति।

☞ सर्वे प्रश्नाः बहुविकल्पात्मकाः सन्ति। केवलं 40 प्रश्नाः समाधेयाः।

☞ सर्वेषां प्रश्नानां कृते एकः (1) अंकः निर्धारितः अस्ति।

☞ प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीयाः।

## प्रश्नपत्रस्य स्वरुपम्
## प्रश्नपत्रेऽस्मिन् त्रयः खण्डाः सन्ति।

**खण्डः – क** **अनुप्रयुक्तं व्याकरणम् – 20 अङ्काः**

**खण्डः– ख** **पठित–अवबोधनम् – 10 अङ्काः**

**खण्डः– ग** **संस्कृतसाहित्येतिहासस्य सामान्यः परिचयः – 10 अङ्काः**

I. **अधोलिखितवाक्येषु रेखाङ्कितपदानां समुचितं संधिपदं संधिविच्छेदं वा प्रदत्तविकल्पेभ्यः चिनुत- (केवलं प्रश्नषट्कम् )** 1x6=6 अङ्काः

1. वनगमननिवृत्तिः **पार्थिवस्य+एव** तावत् |

(क) पार्थिवस्येव (ख) पार्थिवस्यैव

(ग) पार्थिवस्याव (घ) पार्थिवस्योव

2. वैवस्वतो **मनुर्नाम** मनीषिणां माननीयः।

(क) मनुर् + नाम (ख.) मनुः + रनाम

(ग.) मनुः + नाम (घ) मनु + नामः

3. दौवारिकः **गम्भीरस्वरेणैवम्** अवादीत्।

(क) गम्भीर+स्वरेणैवम् (ख) गम्भीरस्वरेण+एवम्

(ग) गम्भीरस्वर + एवम् (घ) गम्भीरस्व +रेणैवम्

4. **आचार्योऽन्तेवासिनम्** अनुशास्ति।

(क) आचार्यो + अन्तेवासिनम् (ख) आचार्य + ओन्तेवासिनम्

(ग) आचार्यः + अन्तेवासिनम् (घ) आचार्य + अन्तेवासिनम्

5. प्रजानामेव **<u>भूत्यर्थं</u>** स ताभ्यो बलिमग्रहीत्।

(क) भूत्य + अर्थम्  (ख) भूत+अर्थम्

(ग) भूति + अर्थम्  (घ) भूत्य+ र्थम्

6. एकशरीरसंक्षिप्ता पृथिवी **<u>रक्षितव्या + इति</u>**।

(क) रक्षितव्याति  (ख) रक्षितव्योति

(ग) रक्षितव्यैति  (घ) रक्षितव्येति

7. **<u>दौवारिक:+तु</u>** तमाकृष्य नयन्नेव प्रचलितः |

(क) दौवारिकस्तु  (ख) दौवरिकश्तु

(ग) दौवरिकष्तु  (घ) <u>दौवरिक:तु</u>

II. **अधोलिखितवाक्येषु रेखाङ्कितपदानां समुचितं समस्तपदं विग्रहवाक्यं वा प्रदत्तविकल्पेभ्यः चिनुत- (केवलं प्रश्नपञ्चकम्)  1x5=5**

8. **<u>धैर्यसागरः</u>** लक्ष्मणः केन क्षोभितः |

(क) धैर्येण सागरः  (ख) धैर्यस्य सागरः

(ग) धैर्याय सागरः  (घ) धैर्यात् सागरः

9. दुष्टः **<u>उरगक्षता</u>** अङ्गुलीव त्याज्यः |

(क) उरगेण क्षता  (ख) उरगस्य क्षता

(ग) उरगे क्षता  (घ) उरगाय क्षता

10. कथं संयासिनोऽपि **<u>कठोरभाषणैः</u>** तिरस्करोसि |

(क) कठोरैः भाषणैः  (ख) कठोरस्य भाषणैः

(ग) कठोरं भाषणैः  (घ) कठोराः भाषणैः

11. **<u>"माता देवो यस्य"</u>** भव |

(क) मातादेवः  (ख) मातृदेवो

(ग) मातादेवो  (घ) मातदेवो

12. **<u>आगतं च प्रत्यागतं च</u>** विदधानः प्रतापदुर्गदौवारिकः पादक्षेपध्वनिं अश्रौषीत् |

(क) आगतप्रत्यागतम्  (ख) आगतप्रत्यागतानां

(ग) आगतं च प्रत्यागतं च  (घ) आगतं प्रत्यागतं

13.स एवाभिज्ञाय त्वया **उचितम् अनतिक्रम्य** व्यवहरिष्यति |

(क) उचितमनतिक्रम्य (ख) अनतिक्रम्य उचितं

(ग) यथोचितम् (घ) उचितं यथा

14.इदानीमपि सन्देहः! किं क्षमा **मनस्वितायाःअभावः**

(क) यथा मनस्विता (ख) निर्मनस्विता

(ग) प्रतिमनस्विता (घ)अनुमनस्विता

III. **अधोलिखितवाक्येषु रेखाङ्कितपदानां समुचितं संयोजितं विभाजितं वा प्रकृतिं प्रत्ययं प्रदत्तविकल्पेभ्यः चिनुत-** **(केवलं प्रश्नषट्कम्)** 1x6=6 अङ्काः

15.वैवस्वतः मनुर्नाम मनीषिणां (**मान् + अनीयर्**) आसीत्।

(क) माननीयः (ख) माननीयर्

(ग) मननीयः (घ) मानानीयः

16.समीपमागत्य संन्यासिना **उक्तम्।**

(क) वच् + क्त (ख) उच्+क्त

(ग) वक्+क्त (घ) उक्+क्त

17.............(**शुद्धि+ मतुप्**) तदन्वये दिलीपः प्रसूतः।

(क) शुद्धिमत् (ख) शुद्धिमतुप्

(ग) शुद्धिमति (घ) शुद्धिमती

18.दौवारिकः तु तम् .......... **नयन्** एव प्राचलत्।

(क) नय् +अन् (ख) नी+ अत्

(ग) नी+ शतृ (घ) नय +न्

19.राज्ञा हस्तेनैव **विसर्जितः** |

(क) वि+सर्ज+तः (ख) वि+सृज्+क्त

(ग) वि+सर्जि+क्त (घ) वि+सृज्+तः

20. **भाषमाणेन** द्वाःस्थेन क्षंयतामेष आगच्छामि |

(क) भाष् + मानेन (ख) भाष् + माणेन

(ग) भाष् + शानच् (घ) भाष + मानच्

21. हन्त! निवेदितम् **अप्रभुत्वम्।**

(क) अप्रभु + त्वम् (ख) प्रभु + त्वम्

(ग) अप्रभु + त्व (घ) अ + प्रभुत्व

IV. **समुचितं उपपदविभक्तिरूपं चिनुत-** 1x3=3

22. आचार्येति पदं प्राप्य ……….. जीवनकलां शिक्षयिष्यामि |

(क) शिष्यैः (ख) शिष्येभ्यः

(ग) शिष्याणां (घ) शिष्येषु

23. दौवारिक! इत आयाहि किमपि ………. कथयिष्यामि |

(क) कर्णात् (ख) कर्णस्य

(ग) कर्णे (घ) कर्णेन

24. अतः परं मातुः ……… श्रोतुं न इच्छामि |

(क) परिवादं (ख) परिवादाय

(ग) परिवादः (घ) परिवादस्य

25. …….. न प्रमदितव्यम् |

(क) सत्यम् (ख) सत्येन

(ग) सत्यात् (घ) सत्यस्य

## खण्डः–ख पठितावबोधनम्

**भाषिककार्यम् –**

**V. निदेशानुसारम् उत्तराणि चिनुत- (केवलं प्रश्नषड्कम्)** 1x6=6

26. "सन्यासिनः अपि कठोरैः भाषणैः तिरस्करोषि" अत्र विशेष्यपदं किम् ?

(क) संन्यासिनः (ख) भाषणैः

(ग) कठोरैः (घ) तिरस्करोषि

27. "प्रजानां भूत्यर्थं स ताभ्यो बलिमग्रहीत्" अत्र 'कल्याणार्थम्' इत्यर्थे किं पदं प्रयुक्तम् ?

(क) भूत्यर्थं (ख) प्रजानाम्

(ग) बलिम् (घ) बलिम्

28. "स परिखीकृतसागरां ऊर्वीं शशास" अत्र 'स' इति सर्वनामपदं कस्मै प्रयुक्तम् ?

(क) दशरथाय (ख) दिलीपाय

(ग) मुञ्जाय (घ) भोजाय

29. सत्यं कथय कस्त्वम् ? अत्र 'कथय' इति क्रियापदस्य कर्तृपदं किम् ?

(क) सत्यम् (ख) कः

(ग) त्वम्　　　(घ) कथय

30. "दुष्टः प्रियः अपि तस्य त्याज्य: आसीत्" अत्र 'सज्जन:' इतिपदस्य किं विलोमपदं प्रयुक्तम् |

(क ) प्रियः　　　(ख) त्याज्यः

(ग) दुष्टः　　　(घ) तस्य

31. "केवलं महाराजशिववीरस्याज्ञां वयं शिरसा वहामः" अत्र क्रियापदं किम्?

(क) वयम्　　　(ख) शिरसा

(ग) वहामः　　　(घ) केवलं

32. "न वयं दौवारिका: ब्रह्मणोऽपि आज्ञां प्रतीक्षामहे" अत्र "वयम्" इति सर्वनामपदं कस्मै प्रयुक्तम्?

(क) दौवारिकेभ्यः　　　(ख) सन्यासिभ्य:

(ग) शिववीरेभ्यः　　　(घ) ब्राह्मणेभ्यः

**VI. अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसंगानुसारं समुचितम् उत्तरं चिनुत-(केवलं प्रश्नचतुष्टयम्)**

**1x4=4**

33. ताम्रं सुवर्णम् विधातुं शक्नुयाः

(क) लौहम्　　(ख) रजतम्

(ग) ताम्रम्　　(घ) कनकम्

34. आचार्याय प्रियं धनमाहृत्य प्रजातन्तुं मा व्यवच्छेत्सीः।

(क) शिष्याय　　　(ख) पुत्राय

(ग ) गुरवे　　　(घ) जनकाय

35. शरीरे अरिः प्रहरति।

(क) शत्रुः　　(ख) मित्रम्

(ग ) भ्राता　　(घ) भगिनी

36. इन्दुः क्षीरनिधाविव।

(क) सूर्यः　　(ख) चन्द्रः

(ग ) ग्रहः　　(घ) नक्षत्रम्

37. तनुवाग्विभवोऽपि सन् रघूणाम् अन्वयं वक्ष्ये।

(क) अन्वितिम्  (ख) वंशावलिम्

(ग) आकाराम्  (घ) कीर्तिम्

## खण्डः–ग  संस्कृतसाहित्येतिहासपरिचयः

**VII. समुचितस्य कवेः रचनायाः वा चयनं कुरुत- ( केवलं प्रश्नत्रयम्)  1x3=3**

38. "प्रतिमानाटकस्य" रचयिता कः?

(क) भासः  (ख) भारविः

(ग) कालिदासः  (घ) वाल्मीकिः

39. "तैत्तिरीयोपनिषदः" ग्रन्थात् पाठ्यपुस्तकस्य कः पाठः स्वीकृतः?

(क) मातुराज्ञा गरीयसी  (ख) अनुशासनम्

(ग) प्रजानुरञ्जको नृपः  (घ) दौवारिकस्य निष्ठा

40. अम्बिकादत्तव्यासस्य रचना का अस्ति?

(क) अभिज्ञानशाकुन्तलम्  (ख) पञ्चतन्त्रम्

(ग) शिवराजविजयम्  (घ) रघुवंशम्

41. "रघुवंशस्य" रचयिता कः?

(क) भासः  (ख) भारविः

(ग) कालिदासः  (घ) वेदव्यासः

**VIII. महाकाव्यस्य-गद्यस्य-चम्पूकाव्यस्य च विधानां समुचितं वैशिष्ट्यं चिनुत- (केवलं प्रश्नत्रयम्) 1x3=3**

42. गद्यकाव्यं कीदृशं भवति?

(क) छन्दोरहितम्  (ख) छन्दोयुक्तम्

(ग) छन्दोसहितम्  (घ) लययुक्तं

43. गद्यपद्यमयं काव्यं भवति?

(क) गद्यकाव्यम्  (ख) पद्यकाव्यम्

(ग) चम्पूकाव्यम्  (घ) नाट्यम्

44. महाकाव्ये न्यूनातिन्यूनाः .......... सर्गाः भवन्ति |

(क) सप्त (ख) षट्

(ग) पञ्च (घ) अष्ट

45. गद्यकाव्यस्य .......... भेदौ स्तः |

(क) एकः (ख) द्वौ

(ग) त्रयः (घ) चत्वारः

**IX. नाट्यतत्त्वानां समुचितम् वैशिष्ट्यं चिनुत- (केवलं प्रश्नचतुष्टयम्) 1x4=4**

46. नाटके मुख्यः .......... रसः भवति |

(क) हास्यः (ख) वीरः

(ग) रौद्रः (घ) भयानकः

47. नाटके न्यूनातिन्यूनाः .......... अङ्काः भवन्ति |

(क) सप्त (ख) षट्

(ग) पञ्च (घ) अष्ट

48. संस्कृतनाटकेषु आरम्भे भवति ?

(क) नान्दी (ख) भरतवाक्यम्

(ग) प्रगल्भम् (घ) संवादः

49. संस्कृतनाटकेषु हास्यपात्रम् कथ्यते ?

(क) मित्रम् (ख) विदूषक:

(ग) नृप: (घ) नट:

50. संस्कृतनाटकेषु अन्ते भवति ?

(क) नान्दी (ख) भरतवाक्यम्

(ग) प्रगल्भम् (घ) संवादः